नाम - तत्वबोध ....
संवत् - १८६२
विषय - दर्शन
पेज - 3
सम्पूर्ण

ओं गणपतयेनमः ओं वासुदेवेंद्रयोगींद्रं नत्वा

... ...

प्राप्तिरस्मयेमुक्तौ सौविज्ञाताशयः इति स्मृते
|| इति तत्वबोध ....

Note - पेज पुरीतरह से फटे हुऐ है।

13

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ॐ गणपतये नमः ॐ वासुदेवेन्द्रयोगीन्द्रं नत्वा ज्ञानप्रदं गुरुं मुमुक्षूणां हितार्थाय तत्वबोधोभि॰
साधनचतुष्टयं किं नित्यानित्यवस्तुविवेकः इहामुत्रार्थफलभोगविरागः शमादिषट्कसंप
त्तिः मुमुक्षुत्वं चेति नित्यवस्त्वेकं ब्रह्म तद्व्यतिरिक्तं सर्वमनित्यं अयमेव नित्यानित्यवस्तुविवे
कः विरागः कः इहस्वर्गभोगेषु इच्छाराहित्यं शमादिसाधनसंपत्तिः का शमो दम उपर
तिस्तितिक्षा श्रद्धा समाधानं चेति शमः कः मनोनिग्रहः दमः कः चक्षुरादिबाह्येन्द्रियनिग्र
हः उपरमः कः स्वधर्मानुष्ठानमेव तितिक्षा का शीतोष्णसुखदुःखादिसहिष्णुत्वं श्रद्धा कीदृशी
गुरुवेदांतवाक्यादिषु विश्वासः श्रद्धा समाधानं किं चित्तैकाग्रता मुमुक्षुत्वं किं मोक्षो मे
भूयादितीच्छा एतत्साधनचतुष्टयं ततस्तत्वविवेकस्याधिकारिणो भवंति तत्वविवेकः
कः आत्मा सत्यं तदन्यत्सर्वं मिथ्येति आत्मा कः स्थूलसूक्ष्मकारणशरीराद्व्यतिरिक्तः पं
चकोशातीतः सन् अवस्थात्रयसाक्षी सच्चिदानंदस्वरूपः सन् यस्तिष्ठति स आत्मा स्थूलश
रीरं किं पंचीकृतपंचमहाभूतैः कृतं सत्कर्मजन्यं सुखदुःखादिभोगायतनं शरीरं अस्ति
जायते वर्द्धते विपरिणमते अपक्षीयते विनश्यति षड्भावविकारवत् एतत्स्थूलशरीरं सूक्ष्म
शरीरं किं अपंचीकृतपंचभूतैः कृतं सत्कर्मजन्यं सुखदुःखादिभोगसाधनं ज्ञानेंद्रियाणि पं
चकर्मेंद्रियाणि पंचप्राणादयः मनश्चैकं बुद्धिश्चैका एवं सप्तदशकलाभिः सह यत्तिष्ठति तत्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ॐ
त॰ बो॰
२

सूक्ष्मशरीरं कारणशरीरं किं अनिर्वाच्यानाद्यविद्यारूपं शरीरद्वयस्य कारणमात्रं सत्
स्वरूपाज्ञानं निर्विकल्पकरूपं यदस्ति तत्कारणशरीरं अवस्थात्रयं किं जाग्रत्स्वप्नसुषुप्त्यव
स्था जाग्रदवस्था का श्रोत्रादिज्ञानेंद्रियैः शब्दादिविषयैश्च ज्ञायते इति यत् जाग्रदव
स्था स्थूलशरीराभिमानि विश्वात्मा इत्युच्यते स्वप्नावस्था केति चेत् जाग्रदवस्थायां दृ
ष्टं यत् श्रुतं तज्जनितवासनया निद्रासमये यः प्रपंचः प्रतीयते सा स्वप्नावस्था सूक्ष्मशरीरा
भिमानी तैजसात्मा इत्युच्यते अतः सुषुप्त्यवस्था का अहं किमपि न जानामि सुखेन म
या निद्रानुभूयते इति सुषुप्त्यवस्था कारणशरीराभिमानी आत्मा प्राज्ञ इत्युच्यते पंचको
शाः के अन्नमयः प्राणमयः मनोमयः विज्ञानमयः आनंदमयश्चेति अन्नमयः कः
अन्नरसेनैव भूत्वा अन्नरसेनैव वृद्धिं प्राप्य अन्नरूपपृथिव्यां यद्विलीयते तदन्नमयः
कोशः स्थूलशरीरं प्राणमयः कः प्राणा [illegible] ं चकं दिपंचवायवः वागादीन्द्रियपंचकं प्राणम री
यःकोशः मनोमयः कः मनश्च ज्ञानेंद्रियपंचकं मिलित्वा भवति मनोमयःकोशः
विज्ञानमयः कः बुद्धिः ज्ञानेंद्रियपंचकं मिलित्वा विज्ञानमयो भवति आनंदमयः कः एवका
रणज्ञानेव टकणिकायामिव वटवृक्षो यद्वर्त्तते तदानंदमयकोशः एतत्को
पंचकंच मदीयं शरीरं मदीयाः प्राणाः मदीयं मनश्च मदीया बुद्धिर्मदीयं ज्ञानमि

2

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ज्ञायते तद्यथा मदीयत्वेन ज्ञातं कुंडलकटककर्णग्रहादिकं स्वस्माद्भिन्नं तथा पंचकोशादिकं म
दीयत्वेन ज्ञातं आत्मा न भवति आत्मा कः तर्हि चेत् सच्चिदानंदस्वरूपः सत् किं कालत्रये
तिष्ठतीति सत् चित् किं ज्ञानस्वरूपः आनंदः कः सुखस्वरूपः एवं सच्चिदानंदस्वरूपः स्वा
त्मानं विजानीयात् अथ चतुर्विंशतितत्त्वोत्पत्तिं वक्ष्यामः ब्रह्माश्रया सत्त्वरजस्तमोगु
णात्मिका मायास्ति ततः आकाशः संभूतः आकाशाद्वायुः वायोस्तेजः तेजसः आपः अ
द्भ्यः पृथ्वी एतेषां पंचतत्त्वानां मध्ये आकाशस्य सात्त्विकांशात् श्रोत्रेंद्रियं संभूतं वायोः सात्त्वि
कांशात् त्वगिंद्रियं संभूतं अग्नेः सात्त्विकांशात् चक्षुरिंद्रियं संभूतं अपां सात्त्विकांशात्
रसेंद्रियं संभूतं पृथ्वीसात्त्विकांशात् ६ घ्राणेंद्रियं संभूतं एतेषां पंचतत्त्वानां मध्ये समष्टिसात्त्विकांशात् मनोबुद्ध्यहंकारचित्तांतःक
रणानि आकाशस्य राजसांशात् वागिंद्रियं संभूतं वायोः राजसांशात् पाणींद्रियं संभूतं वह्ने रा
जसांशात् पादेंद्रियं संभूतं अपां राजसांशात् उपस्थेंद्रियं संभूतं पृथ्वीराजसांशात् गुदेंद्रियं संभू
तं एतेषां पंचतत्त्वानां मध्ये समष्टिराजसांशात् पंचप्राणाः संभूतानि इति एतेषां पंचत
त्त्वानां तामसांशात् यः एकं एकं भूतं द्विधा विभज्य एकं एकं अर्धं पृथक् तूष्णीं व्यवस्थाप्य अपरं अ
परं अर्धं चतुर्धा विभज्य स्वार्धं भिन्नेषु अर्धेषु स्वभागचतुष्टयसंयोजनं कार्यं तदा पंची
पंचीकृतपंचतत्त्वानि भवंति पंचीकरणं कथमिति चेत् एतेषां पंचभूतानां तामसांशात् ४२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

करणं भवति एतेभ्यः पंचीकृतपंचमहाभूतेभ्यः तत्स्थूलशरीरं भवति एवं पिंडब्रह्मांडयो
रैक्यं ब्रह्मांडसंभूतस्थूलशरीराभिमानी जीवनामकं ब्रह्मप्रतिबिंबं भवति स एव जीवः प्रकृ
त्या स्वस्मात् ईश्वरं भिन्नत्वेन जानाति अविद्योपाधिः सन् आत्मा जीव इत्युच्यते मायोपा
धिः सन् ईश्वर इत्युच्यते एवं उपाधिभेदात् जीवेश्वरभेददृष्टिर्यावत्पर्यंतं तज्जन्ममरणादिरू
पसंसारो न निवर्तते तस्मात्कारणान्न जीवेश्वरयोर्भेदबुद्धिः कार्या ननु साहंकारस्य किंचि
ज्ज्ञस्य जीवस्य निरहंकारस्य सर्वज्ञस्य तत्त्वमसीति महावाक्यात् कथमभेदबुद्धिः स्यात् उभ
योर्विरुद्धधर्माक्रांतत्वात् इति चेन्न स्थूलसूक्ष्मशरीराभिमानी त्वंपदवाच्यार्थः उपाधिवि
निर्मुक्तं समाधिदशासंपन्नं शुद्धं चैतन्यं लक्ष्यं एवं सर्वज्ञत्वादिविशिष्टो ईश्वरः तत्पदवा
च्यः उपाधिशून्यं शुद्धं चैतन्यं लक्ष्यं एवं जीवेश्वरयोर्भेदबाधकाभावः एवं च वेदांतवाक्यैः
सद्गुरूपदेशेन सर्वेष्वपि भूतेषु येषां ब्रह्मबुद्धिरुत्पन्ना ते जीवन्मुक्ताः ननु जीवन्मुक्तः कः
यथा देहोहं पुरुषोहं ब्राह्मणोहं क्षत्रियोहं वैश्योहं शूद्रहमस्मीति दृढनिश्चयः तथा
नाहं ब्राह्मणः न शूद्रः न पुरुषः किंतु असंगः सच्चिदानंदस्वरूपः प्रकाशरूपः सर्वांतर्या
चिदाकाशरूपोस्मीति दृढनिश्चयरूपापरोक्षज्ञानवान् जीवन्मुक्तः ब्रह्मै

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्मैक्यज्ञानेन निखिलकर्मबंधविनिर्मुक्तः स्यात् कर्माणि कति विधानि संतीति चेत् आगामी
संचितप्रारब्धभेदेन त्रिविधानि संति ज्ञानोत्पत्त्यनंतरं ज्ञानीदेहकृतं पुण्यपापरूपं कर्म यदस्ति त
दागामीत्यभिधीयते संचितं कर्म किं अनंतकोटिजन्मनां बीजभूतं सत् यत्कर्मजातं
पूर्वार्जितं तिष्ठति तत्संचितं ज्ञेयं प्रारब्धं कर्म किमिति चेत् इदं शरीरमुत्पाद्य इहलोके सु
खदुःखादिप्रदं यत्कर्म तत्प्रारब्धं भोगेन नष्टं भवति प्रारब्धकर्मणां भोगादेव क्षय इति संचितं
कर्म ब्रह्मैवाहमिति निश्चयात्मकज्ञानेन नश्यति आगामी कर्मापि ज्ञानेन नश्यति आगा
मिकर्मणां नलिनीदलगतजलवत् ज्ञानिनां संबंधो नास्ति किंच ये ज्ञानिनं स्तुवंति भजं
ति अर्चयंति तान् प्रति ज्ञानिकृतं आगामी पुण्यं गच्छति ये च ज्ञानिनं निंदंति द्विषंति दुःखप्रदा
नं कुर्वंति तान् प्रति ज्ञानिकृतं सर्वमागामी क्रियमाणं यदवाच्यं कर्म पापात्मकं गच्छति त
था च कृते सुहृदः पुण्यकृत्यां द्विषंतः पापकृत्यां गृह्णातीति तथा चात्मवित्संसारं तीर्त्वा
ब्रह्मानंदं इहैव प्राप्नोति तरति शोकमात्मविदिति श्रुतेः तनुं त्यजतु वा काश्यां श्वप[illegible]
स्य गृहे ऽथ वा ज्ञानसंप्राप्तिसमये मुक्तोसौ विगताशयः इति स्मृतेः ॥ इति तत्त्वबोध[illegible]
समाप्तः संपूर्णः ॥ शुभमस्तु ॥ संवत् १९०२ ॥ रामः ॥ ॥ ॥ ॥ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation

ओंनमः
राम

6

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA